वधक्रिया। जयो विवादे द्यूते च संग्रामे च तथा द्विज!। भक्षणञ्चाद्रमांसानां मत्स्यानां पायसस्य च। दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च। सुरारुधिरमद्यानां पानं क्षीरस्य चाथ वा। अन्त्रैर्वा वेष्टनं भूमौ निर्मलं गगनं तथा। मुखेन दोहनं शस्तं महिषीणां तथा गवाम्। सिंहीनां हस्तिनीनाञ्च बडवानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः। अम्भसा त्वभिषेकस्तु गवां शृङ्गाश्रितेन वा। चन्द्राद् भ्रष्टेन वा राजन्! ज्ञेयो राज्यप्रदो हि सः। राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा। मरणं वह्निदाहश्च वह्निदाहो गृहादिषु। लब्धिश्च राज्यलिङ्गानां तन्त्रीवाद्याभिवादनम्। तथोदकानां तरणं तथा विषमलङ्घनम्। हस्तिनीवडवानाञ्च गवाञ्च प्रसवो गृहे। आरोहणमथाश्वानां रोदनञ्च तथाशुभम्। वरस्त्रीणां तथालाभस्तथालिङ्गनमेव च। निगडैर्बन्धनं धन्यं तथा विष्ठानुलेपनम्। जीवतां भूमिपालानां सुहृदामपि दर्शनम्। दर्शनं देवतानाञ्च विमलानां तथाम्भसाम्। शुभान्यथैतानि नरस्तु दृष्ट्वा प्राप्नोत्ययत्नाद् ध्रुवमर्थलाभम्। स्वप्नानि वै धर्मभृतां वरिष्ठ! व्याधेर्विमोक्षञ्च तथातुरोऽपि" मात्स्य० न०।

**स्वप्नकृत्** न० स्वप्नं निद्रां करोति कृ-क्विप्। (सुसुनि) शाके शब्दच०।

**स्वप्नज्** त्रि० स्वप-नजिङ्। शयनशीले अमरः।

**स्वभाव** पु० स्वस्य भावः। १निसर्गे अजन्ये स्वतःसिद्धे भावे च अमरः। "बहिर्हेत्वनपेक्षी तु स्वभावोऽथ प्रकीर्तितः। निसर्गश्च स्वभावश्च इत्येष भवति द्विधा। निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते। अजन्यस्तु स्वतः सिद्धः स्वरूपो भाव उच्यते" उज्ज्वलद०।

**स्वभावोक्ति** स्त्री स्वभावस्योक्तिरत्र। १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् हेम०। २स्वभावस्य कथने।

**स्वभू** पु० स्वेनैव भवति भू-क्विप्। १ब्रह्मणि मेदि० २विष्णौ अमरः। ३शिवे ४ईश्वरे ५कामे च।

**स्वयंवर** पु० स्वयमात्मना वरो वरणम्। कन्ययात्मनैव स्वपतेर्वरणे "सदसि स्वयंवरः" नैष०। स्वयं वृणुते पतिम्। वृ-अच्। आत्मनैव पतिवरणकर्त्र्यां २कन्यकायां स्त्री।

**स्वयंहारिका** स्त्री ब्रह्मणो मानसपुत्रस्य दुःसहस्य निर्माष्ट्यां भार्यायामुत्पन्ने कन्याभेदे मार्कण्डेयपु०। तत्र कन्याद्याष्टौ नियोजितानादयः तासां कर्माणि तत्रोक्तानि तत्र "एतासां कर्म वक्ष्यामि द्रव्यापहरणञ्च यत्" इत्युपक्रमे "धान्यं खलात् गृहात् गोष्ठात् पयःसर्पिस्तथा परा। वस्तु द्वित्र्यादिवद्द्रव्यमपहरन्ति च कन्यका। सा स्वयंहारिकेत्युक्ता सदान्तर्द्धानतत्परा" इति तस्याः कर्मोक्तम्।

**स्वयङ्कृत** पु० स्वयमात्मना कृतः। १कृत्रिमे पुत्रे "माता पितृविहीनस्तु कृत्रिमः स्यात् स्वयंकृतः" स्मृतिः। २आत्मकृते त्रि०। "पूर्वजुष्टः स्वयंकृतः" (पुरोहितः) स्मृतिः।

**स्वयङ्गुप्ता** स्त्री स्वयमात्मनैव गुप्ता। शूकशिम्ब्याम् शब्दच०।

**स्वयन्दत्त** पु० स्वयमात्मनैव न तु पितृमातृभ्यां दत्तः उपनतः दत्तात्मनि पुत्रभेदे "दत्तात्मा तु स्वयन्दत्तः" याज्ञ०। "दत्तात्मा तु पुत्रो मातापितृविहीनस्ताभ्यां विमुक्तो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०।

**स्वयम्** अव्य० सु+अय-अमु। आत्मनेत्यर्थे अमरः।

**स्वयम्भु** पु० स्वयम्+भू-डु। ब्रह्मणि द्विरूप०। [राजनि०।

**स्वयम्भुवा** पु० स्वयम्भवति भू-मूलवि० क। धूम्रान्त्रायाम्

**स्वयम्भू** पु० स्वयं भवति भू-क्विप्। १चतुर्मुखे ब्रह्मणि अमरः २कुचे च। ३काले शब्दर० ४कामदेवे ५विष्णौ ६शिवे च। ७माषपर्ण्यां दन्तिकिन्याम् राजनि०। ९जिनभेदे हेमच०। १०परमेश्वरे "ततः स्वयम्भूर्भगवान्" मनुः। [अस्वरत्-न।

**स्वर** आक्षेपे अद० चुरा० उभ० सक० सेट्। स्वरयति-ते

**स्वर्** अव्य० स्वृ-विच्। १स्वर्गे अमरः "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्" इत्युक्ते दुःखासंभिन्ने २सुखसन्ताने ३परलोके ४आकाशे ५शोभने च शब्दच०। दुःखासंभिन्नत्वं च स्वावच्छेदकशरीरावच्छिन्नत्वं तेन दुःखासमानकालीने सुखे नातिव्याप्तिः।

**स्वर** पु० स्वर-अच स्वृ-अप् वा। १उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणप्रयत्नभेदे तादृशस्वरवत्त्वाच्च २व्यञ्जनभिन्नवर्णेषु अकारादिषु शिक्षा। तन्त्रोक्ते २प्राणादिवायोर्व्यापारभेदे ३कालादिकृते वर्णाद्युच्चारणाध्वनिविशेषे ४निषादादिषु तन्त्रीकण्ठोत्थेषु गानजध्वनिषु च अमरः। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" शिक्षा० अकारादीनां स्वयंराजमानत्वात् स्वरवत्त्वाच्च स्वरपदाभिधेयता, "अचः स्वयं विराजन्ते हलस्तु परगामिनः" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि" शिक्षोक्तेश्च। निषादादिस्वराणां प्राणिभेदस्वरतुल्यता नारदेनोक्ता यथा "षड्जं रौति मयूरो हि वृषो नर्दति ऋषभम्। अजा